# अध्याय ३

जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे ।

videha, kuru, pañcāla *nom.pr.* - название царств и населявших их народностей;

तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुः ।

तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां ब्राह्मणानामनूचानतम इति ।

स ह गवां सहस्रमवरुरोध ।

दशदश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ ३.१.१ ॥

pāda *m* – мера веса около 10 гр.;

तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ।

ud√aj I P. – выгонять;

ते ह ब्राह्मणा न दधृषुः ।

अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाच एताः सौम्योदज सामश्रवा३ इति । ता होदाचकार ।

yājñavalkya, sāmaśravas *nom.pr.*;
udā√kar VIII U. – выгонять;

ते ह ब्राह्मणाश्चुक्रुधुः कथं नु नो ब्रह्मिष्ठो ब्रुवीतेति ।

अथ ह जनकस्य वैदेहस्य होताश्वलो बभूव ।

aśvala - *nom.pr.*

स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति ।

स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म इति ।

तं ह तत एव प्रष्टुं दध्रे होताश्वलः ॥ ३.१.२ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्युनाप्तं सर्वं मृत्युनाभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति ।

abhi√pad IV Ā. - отправляться, обращаться, выпадать на долю, достигать;

होत्रर्त्विजाग्निना वाचा । वाग्वै यज्ञस्य होता ।

तद्येयं वाक्सोऽयमग्निः स होता सा मुक्तिः सातिमुक्तिः ॥ ३.१.३ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वमहोरात्राभ्यामाप्तं सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इति ।

अध्वर्युणर्त्विजा चक्षुषादित्येन ।

चक्षुर्वै यज्ञस्याध्वर्युः । तद्यदिदं चक्षुः सोऽसावादित्यः ।

सोऽध्वर्युः सा मुक्तिः सातिमुक्तिः ॥ ३.१.४ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तं सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं

केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इति ।

उद्गात्रर्त्विजा वयुना प्राणेन । प्राणो वै यज्ञस्योद्गाता ।

तद्योऽयं प्राणः स वायुः स उद्गाता । स मुक्तिः सातिमुक्तिः ॥ ३.१.५ ॥

याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्बणमिव केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ।

ārambaṇa (=ālambana) *n* – поддержка, опора;

ब्रह्मणर्त्विजा मनसा चन्द्रेण । मनो वै यज्ञस्य ब्रह्मा ।

तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः सातिमुक्तिरित्यतिमोक्षा । अथ संपदः ॥ ३.१.६ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होतास्मिन् यज्ञे करिष्यतीति ।

तिसृभिरिति । कतमास्तास्तिस्र इति ।

पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।

किं ताभिर्जयतीति । यत्किञ्चेदं प्राणभृदिति ॥ ३.१.७ ॥

याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन् यज्ञ आहुतीर्होष्यतीति ।

तिस्र इति । कतमास्तास्तिस्र इति ।

या हुता उज्ज्वलन्ति या हुता अतिनेदन्ति या हुता अधिशेरते ।

ati√ned I P. – струиться, течь, пениться;
adhi√śī II Ā. – лежать, отдыхать; спать;

किं ताभिर्जयतीति ।

या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति । दीप्यत इव हि देवलोको ।

या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयति । अतीव हि पितृलोकः ।

या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यि । अध इव हि मनुष्यलोकः ॥ ३.१.८ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीति ।

एकयेति । कतमा सैकेति । मन एवेति ।

अनन्तं वै मनोऽनन्ता विश्वे देवाः ।

अनन्तमेव स तेन लोकं जयति ॥ ३.१.९ ॥

याज्ञवल्क्येति होवाच कत्ययमद्योद्गातास्मिन् यज्ञे स्तोत्रियाः स्तोष्यतीति ।

तिस्र इति । कतमास्तास्तिस्र इति ।

पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।

कतमास्ताः । या अध्यात्ममिति ।

प्राण एव पुरोनुवाक्यापानो याज्या व्यानः शस्या ।

किं ताभिर्जयतीति ।

पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकं शस्यया ।

ततो ह होताश्वल उपरराम ॥ ३.१.१० ॥

इति तृतीयाध्याये प्रथममश्वलब्राह्मणम् ॥ १ ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ ।

jāratkārava ārtabhāga *nom.pr.*

याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति ।

graha *m – здесь* орудие восприятия (их восемь: пять органов чувств, разум, руки, речь);
atigraha *m – здесь* объект восприятия;

अष्टौ ग्रहा अष्टावतिग्रहा इति ।

ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ ३.२.१ ॥

प्राणो वै ग्रहः । सोऽपानेनातिग्रहेण गृहीतः ।

प्राणेन हि गन्धाञ्जिघ्रति ॥ ३.२.२ ॥

वाग्वै ग्रहः । स नाम्नातिग्रहेण गृहीतः ।

वाचा हि नामान्यभिवदति ॥ ३.२.३ ॥

जिह्वा वै ग्रहः । स रसेनातिग्रहेण गृहीतः ।

जिह्वया हि रसान् विजानाति ॥ ३.२.४ ॥

चक्षुर्वै ग्रहः । स रूपेणातिग्रहेण गृहीतः ।

चक्षुषा हि रूपाणि पश्यति ॥ ३.२.५ ॥

श्रोत्रं वै ग्रहः । स शब्देनातिग्रहेण गृहीतः ।

श्रोत्रेण हि शब्दाञ्शृणोति ॥ ३.२.६ ॥

मनो वै ग्रहः । स कामेनातिग्रहेण गृहीतः ।

मनसा हि कामान् कामयते ॥ ३.२.७ ॥

हस्तौ वै ग्रहः। स कर्मणातिग्रहेण गृहीतः ।

हस्ताभ्यां हि कर्म करोति ॥ ३.२.८ ॥

त्वग्वै ग्रहः । स स्पर्शेनातिग्रहेण गृहीतः ।

त्वचा हि स्पर्शान् वेदयत इत्यष्टौ ग्रहा अष्टावतिग्रहाः ॥ ३.२.९ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नमिति ।

अग्निर्वै मृत्युः सोऽपामन्नम् । अप पुनर्मृत्युं जयति ॥ ३.२.१० ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो नेति ।

नेति होवाच याज्ञवल्क्यः । अत्रैव समवनीयन्ते । स उच्छ्वयति । आध्मायति ।

samava√nī I U. – вести вместе, объединять;
uc√chvi (ud√śvi) IV P. – опухать, раздуваться, увеличиваться;
ā√dhmā I P. – надувать, наполнять воздухом;

आध्मातो मृतः शेते ॥ ३.२.११ ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति ।

नामेति । अनन्तं वै नामानन्ता विश्वे देवाः ।

अनन्तमेव स तेन लोकं जयति ॥ ३.२.१२ ॥

ज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति

वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं

पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि

वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते

क्वायं तदा पुरुषो भवतीति ।

आहर सौम्य हस्तम् आर्तभाग ।

आवामेवैतस्य वेदिष्यावो न नावेतत्सजन इति ।

तौ होत्क्रम्य मन्त्रयां चक्राते ।

तौ ह यदूचतुः कर्म हैव तदूचतुः ।

अथ ह यत्प्रशंसतुः कर्म हैव तत्प्रशशंसतुः ।

पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ।

ततो ह जारत्कारव आर्तभाग उपरराम ॥ ३.२.१३ ॥

इति तृतीयाध्याये द्वितीयमार्तभागब्राह्मणम् ॥२॥

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ

bhujyu – *nom.pr;*
lāhyāyani *nom.pr.* - происходящий из рода Лахья;

याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्यव्रजाम । ते पतञ्चलस्य काप्यस्य गृहानैम ।

patañcala – *nom.pr;*
kāpya *nom.pr.* - происходящий из рода Капи;

तस्यासीद्दुहिता गन्धर्वगृहीता ।

तमपृच्छाम कोऽसीति । सोऽब्रवीत्सुधन्वाङ्गिरस इति ।

sudhanvan – *nom.pr;*
āngirasa *nom.pr.* - происходящий из рода Ангираса;

तं यदा लोकानामन्तानपृच्छाम । अथैनमब्रूम क्व पारिक्षिता अभवन्निति ।

pārikṣita *patron.* – потомки царя Куру Парикшита;

क्व पारिक्षिता अभवन् । स त्वा पृच्छामि याज्ञवल्क्य । क्व पारिक्षिता अभवन्निति ॥ ३.३.१ ॥

स होवाच उवाच वै सः ।

अगच्छन् वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति ।

क्व न्वश्वमेधयाजिनो गच्छन्तीति ।

द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकः ।

तं समन्तं पृथिवी द्विस्तावत्पर्येति ।

तां समन्तं पृथिवीं द्विस्तावत्समुद्रः पर्येति ।

तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्त्रं तावानन्तरेणाकाशः तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत् ।

तान् वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्निति ।

एवमिव वै स वायुमेव प्रशशंस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिः ।

vyaṣṭi *f* - удача, успех; одиночность, индивидуальность;
samaṣṭi *f* - достижение, получение; завершение, окончание; совокупность, всеобщность;

अप पुनर्मृत्युं जयति य एवं वेद ।

ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ ३.३.२ ॥

इति तृतीयाध्यायस्य तृतीयं ब्राह्मणम् ॥३॥

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ ।

uṣasta - *nom.pr.*
cākrāyaṇa - *nom.pr. patron.;*

याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति ।

एष त आत्मा सर्वान्तरः ।

कतमो याज्ञवल्क्य सर्वांतरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः ।

योऽपानेनापानिति स त आत्मा सर्वान्तरः ।

यो व्यानेन व्यनिति स त आत्मा सर्वान्तरः ।

य उदानेनोदनिति स त आत्मा सर्वान्तरः ।

एष त आत्मा सर्वान्तरः ॥ ३.४.१ ॥

स होवाचोषस्तश्चाक्रायणः

यथा वै ब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति ।

यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति ।

एष त आत्मा सर्वान्तरः ।

कतमो याज्ञवल्क्य सर्वान्तरः ।

न दृष्टेर्द्रष्टारं पश्येः । न श्रुतेः श्रोतारं शृणुयाः ।

न मतेर्मन्तारं मन्वीथा । न विज्ञातेर्विज्ञातारं विजानीयाः ।

एष त आत्मा सर्वान्तरः । अतोऽन्यदार्तम् ।

ततो होषस्तश्चाक्रायण उपरराम ॥ ३.४.२ ॥

इति तृतीयाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच ।

kahola- *nom.pr.;*
kauṣītakeya- *nom.pr. patron.;*

यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति ।

एष त आत्मा सर्वान्तरः ।

कतमो याज्ञवल्क्य सर्वान्तरः ।

योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति ।

एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ।

eṣaṇā *f* - желание, поиск;
vyut√thā (vi-ud√sthā) I U. - рассеиваться, отворачиваться от ч.-л. (+Abl.);

या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा ।

उभे ह्येते एषणे एव भवतः ।

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् ।

nir√vid VI P. - узнать, избавиться, закончить;

बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः ।

अमौनं च मौनं च निर्विद्याथ ब्राह्मणः ।

स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एव । अतोऽन्यदार्तम् ।

ततो ह कहोलः कौषीतकेय उपरराम ॥ ३.५.१ ॥

इति तृतीयाध्यायस्य पञ्चमं ब्राह्मणम् ॥४॥

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच ।

gārgī - *nom.propr. f;*
vācaknavī - *patron.;*

यदिदं सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति ।

ota (p.p. от ā√ve) - переплетенный, натянутый;
prota (p.p. от pra√ve) - прикрепленный к ч.-л., воткнутый во ч.-л.;

वायौ गार्गीति । कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेति ।

अन्तरिक्षलोकेषु गार्गीति ।

कस्मिन्नु खल्वन्तरिक्षलोका ओतश्च प्रोतश्चेति ।

गन्धर्वलोकेषु गार्गीति ।

कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेति ।

अदित्यलोकेषु गार्गीति ।

कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति ।

चन्द्रलोकेषु गार्गीति ।

कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति ।

नक्षत्रलोकेषु गार्गीति ।

कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति ।

देवलोकेषु गार्गीति ।

कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेति ।

इन्द्रलोकेषु गार्गीति ।

कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति ।

प्रजापतिलोकेषु गार्गीति ।

कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ।

ब्रह्मलोकेषु गार्गीति ।

कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति ।

स होवाच गार्गि मातिप्राक्षीः । मा ते मूर्धा व्यपप्तत् ।

ati√prach VI P. - продолжать спрашивать;

अनतिप्रश्न्यां वै देवतामतिपृच्छसि ।

गार्गि मातिप्राक्षीरिति ।

ततो ह गार्गी वाचक्नव्युपरराम ॥ ३.६.१ ॥

इति तृतीयाध्याये षष्ठं गार्गीब्राह्मणम् ॥ ६ ॥

अथैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच ।

uddālaka - *nom.pr.;*
āruṇi - *patron.;*

मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानाः ।

तस्यासीद्भार्या गन्धर्वगृहीता । तमपृच्छाम कोऽसीति ।

सोऽब्रवीत्कबन्ध आथर्वण इति ।

kabandha - *nom.pr.;*

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तत्सूत्रं

yājñika *m* - знаток обряда жертвоприношения;

यस्मिन्नयं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति ।

saṃdṛbdha (p.p. от saṃ√darbh) - сплетенный, связанный;

सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन् वेदेति ।

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकांश्च ।

वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकं सर्वाणि च भूतान्यन्तरो यमयति ।

सोऽब्रवीत्पतञ्चलः काप्यो नाहं तं भगवन् वेदेति ।

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकांश्च ।

यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स आत्मवित्स सर्ववित् ।

इति तेभ्योऽब्रवीत् । तदहं वेद ।

तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यति ।

©cc-by-nc-sa 2004-2025 Н.П.Лихушина


वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति ।

यो वा इदं कश्च ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ ३.७.१ ॥

स होवच वायुर्वै गौतम तत्सूत्रम् ।

वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति ।

तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्याङ्गानीति ।

vi√sraṃs I Ā. - распадаться, выпадать;

वायुना हि गौतम सूत्रेण सम्दृब्धानि भवन्तीति ।

एवमेवैतद्याज्ञवल्क्य ।अन्तर्यामिणं ब्रूहीति ॥ ३.७.२ ॥

यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद

यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.३ ॥

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.४ ॥

योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.५ ॥

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं

योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.६ ॥

यो वायौ तिष्ठन् वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.७ ॥

यो दिवि तिष्ठन् दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.८ ॥

य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं

य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.९ ॥

यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं

यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१० ॥

यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्रतारकं शरीरं
यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.११ ॥

य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं
य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१२ ॥

यस्तमसि तिष्ठंस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१३ ॥

यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यं तेजो न वेद यस्य तेजः शरीरं
यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१४ ॥

इत्यधिदैवतम्। अथाधिभूतम् ।
यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भुतानि शरीरं
यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । इत्यधिभूतम् ॥ ३.७.१५ ॥

अथाध्यात्मम् । यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं
यः प्राणमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ३.७.१६ ॥

यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ्न वेद यस्य वाक्शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१७ ॥

यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१८ ॥

यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यं श्रोत्रं न वेद यस्य श्रोत्रं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.१९ ॥

यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.२० ॥

यस्त्वचि तिष्ठंस्त्वचोऽन्तरो यं त्वङ्ग वेद यस्य त्वक्शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.२१ ॥

यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं
यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३.७.२२ ॥

यो रेतसि तिष्ठं रेतसोऽन्तरो यं रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।
अदृष्टो द्रष्टाश्रुतः श्रोतामतो मन्ताविज्ञतो विज्ञाता ।
नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाता ।
एष त आत्मान्तर्याम्यमृतः । अतोऽन्यदार्तम् ।
ततो होद्दालक आरुणिरुपरराम ॥ ३.७.२३ ॥

इति तृतीयाध्याये सप्तममन्तर्यामिब्राह्मणम् ॥७॥

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि ।
तौ चेन्मे विवक्ष्यति । न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ।

brahmodya *n* – обсуждение богословских вопросов, богословский диспут;

पृच्छ गार्गीति ॥ ३.८.१ ॥

सा होवाच अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा

ujjya – с ослабленной тетивой;
adhijya – с натянутой тетивой;

द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम् ।

bāṇavant *m* – стрела;
ativyādhin – пронзающий насквозь;
upotthā (upa-ud√sthā) I P. – вставать, подниматься, идти навстречу, приближаться;

तौ मे ब्रूहीति । पृच्छ गार्गीति ॥ ३.८.२ ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥ ३.८.३ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥ ३.८.४ ॥

सा होवच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥ ३.८.५ ॥

vi√vac II P. – разъяснять, решать;

√dhar I Ā. (тж. *caus.*) – готовиться;

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥ ३.८.६ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति ।

कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ३.८.७ ॥

स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमो
ऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यम्
न तदश्नाति किं चन । न तदश्नाति कश्चन ॥ ३.८.८ ॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्यचन्द्रमसौ विधृतौ तिष्ठतः ।

vi√dhar I P. – разделять; удерживать, подавлять;

एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः ।

एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति ।

nimeṣa *m* – мигание, моргание; момент, мгновение;

एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमनु ।

एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवाः दर्वीं पितरोऽन्वायत्ताः ॥ ३.८.९ ॥

darvī *f* – ложка; особое жертвоприношение предкам, совершаемое ложкой;
anvāyatta (p.p. от anvā√yat) – связанный, находящийся в соответствии, имеющий право на ч.-л.;

यो वा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति

यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः ।

अथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः ॥ ३.८.१० ॥

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ ।

नान्यदतोऽस्ति द्रष्टृ । नान्यदतोऽस्ति श्रोतृ ।

नान्यदतोऽस्ति मन्तृ । नान्यदतोऽस्ति विज्ञातृ ।

एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च ॥ ३.८.११ ॥

सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्यध्वं यदस्मान्नमस्कारेण मुच्येध्वम् ।

न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ।

ततो ह वाचक्नव्युपरराम ॥ ३.८.१२ ॥

इति तृतीयाध्यायेष्टममक्षरब्राह्मणम् ॥८॥

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति ।

स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते ।

nivid *f* – стихи из хвалебного гимна *вищведевам*, содержащие перечень богов;

त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ।

ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति । त्रयस्त्रिंशदिति ।

ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति । षडिति ।

ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति । त्रय इति ।

ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति । द्वाविति ।

ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति ।अध्यर्ध इति ।

adhyardha – один с половиной;

ओमिति होवाच । कत्येव देवा याज्ञवल्क्येति । एक इति ।

ओमिति होवाच । कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ ३.९.१ ॥

स होवाच महिमान एवैषामेते । त्रयस्त्रिंशत्त्वेव देवा इति ।

कतमे ते त्रयस्त्रिंशदिति ।

अष्टौ वसव एकादश रुद्रा द्वादशादित्याः त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति ॥ ३.९.२ ॥

कतमे वसव इति ।

अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौः च चन्द्रमाश्च नक्षत्राणि चैते वसवः ।

एतेषु हीदं सर्वं हितं इति तस्माद्वसव इति ॥ ३.९.३ ॥

कतमे रुद्रा इति ।

दशेमे पुरुषे प्राणा आत्मैकादशः ।

ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति ।

तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ३.९.४ ॥

कतम आदित्या इति ।

द्वादश वै मासाः संवत्सरस्यैत आदित्याः ।

एते हीदं सर्वमाददाना यन्ति ।

ते यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ३.९.५ ॥

कतम इन्द्रः कतमः प्रजापतिरिति ।

स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति ।

stanayitnu *m* – гром;

कतमः स्तनयित्नुरिति ।अशनिरिति ।

aśani *f* – молния;

कतमो यज्ञ इति । पशव इति ॥ ३.९.६ ॥

कतमे षडिति ।

अग्निश्च पृथिवी च वायुश्चान्तरिक्षश्चादित्यश्च द्यौश्चैते षट् ।

एते हीदं सर्वं षडिति ॥ ३.९.७ ॥

कतमे ते त्रयो देवा इति ।

इम एव त्रयो लोकाः । एषु हीमे सर्वे देवा इति ।

कतमौ तौ द्वौ देवा इति ।

अन्नं चैव प्राणश्चेति ।

कतमोऽध्यर्ध इति ।

योऽयं पवत इति ॥ ३.९.८ ॥

तदाहुर्यदयमेक इवैव पवते । अथ कथमध्यर्ध इति ।

यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति ।

adhy√ṛdh V P. – увеличиваться, расширяться;

कतम एको देव इति ।

प्राण इति । स ब्रह्म त्यदित्याचक्षते ॥ ३.९.९ ॥

पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायं शारीरः पुरुषः स एषः ।

वदैव शाकल्य तस्य का देवतेति ।

अमृतमिति होवाच ॥ ३.९.१० ॥

काम एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायं काममयः पुरुषः स एषः ।

वदैव शाकल्य तस्य का देवतेति ।

स्त्रिय इति होवाच ॥ ३.९.११ ॥

रूपाण्येव यस्यायतनं चक्षुर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवासावादित्ये पुरुषः स एषः ।

वदैव शाकल्य तस्य का देवतेति ।

सत्यमिति होवाच ॥ ३.९.१२ ॥

आकश एव यस्यायतनं श्रोत्रं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायं श्रौतः प्रातिश्रुत्कः पुरुषः स एष ।

śrauta – относящийся к слуху;
pratiśrutkā *f* – эхо;

वदैव शाकल्य तस्य का देवतेति ।

दिश इति होवच ॥ ३.९.१३ ॥

तम एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायं छायामयः पुरुषः स एषः ।

वदैव शाकल्य तस्य का देवतेति ।

मृत्युरिति होवाच ॥ ३.९.१४ ॥

रूपाण्येव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायमादर्शे पुरुषः स एषः ।

ādarśa *m* - зеркало;

वदैव शाकल्य तस्य का देवतेति ।

असुरिति होवाच ॥ ३.९.१५ ॥

आप एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद् वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायं अप्सु पुरुषः स एषः ।

वदैव शाकल्य तस्य का देवतेति ।

वरुण इति होवाच ॥ ३.९.१६ ॥

रेत एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद् वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ ।

य एवायं पुत्रमयः पुरुषः स एषः ।

वदैव शाकल्य तस्य का देवतेति ।

प्रजापतिरिति होवाच ॥ ३.९.१७ ॥

शाकल्येति होवाच याज्ञवल्क्यः । त्वां स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥ ३.९.१८ ॥

aṅgārāvakṣayaṇa *n* – приспособление для тушения углей;

याज्ञवल्क्येति होवाच शाकल्यः ।

यदिदं कुरुपञ्चालानां ब्राह्मनानत्यवादीः किं ब्रह्म विद्वानिति ।

दिशो वेद सदेवाः सप्रतिष्ठा इति ।

यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ ३.९.१९ ॥

किंदेवतोऽस्यां प्राच्यां दिश्यसीति । आदित्यदेवत इति ।

kiṃdevata - какое божество имеющий?

स आदित्यः कस्मिन् प्रतिष्ठित इति । चक्षुषीति ।

कस्मिन्नु चक्षुः प्रतिष्ठितमिति ।

रूपेष्विति । चक्षुषा हि रूपाणि पश्यति ।

कस्मिन्नु रूपाणि प्रतिष्ठितानीति ।

हृदय इति होवाच । हृदयेन हि रूपाणि जानाति ।

हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ३.९.२० ॥

किंदेवतोऽस्यां दक्षिणायां दिश्यसीति ।

यमदेवत इति ।

स यमः कस्मिन् प्रतिष्ठित इति । यज्ञ इति ।

कस्मिन्नु यज्ञः प्रतिष्ठित इति । दक्षिणायामिति ।

कस्मिन्नु दक्षिणा प्रतिष्ठितेति ।

श्रद्धायामिति । यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति ।

श्रद्धायां ह्येव दक्षिणा प्रतिष्ठितेति ।

कस्मिन्नु श्रद्धा प्रतिष्ठितेति ।

हृदय इति होवाच । हृदयेन हि श्रद्धाम् जानाति ।

हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ३.९.२१ ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति ।

वरुणदेवत इति ।

स वरुणः कस्मिन् प्रतिष्ठित इति । अप्स्विति ।

कस्मिन्न्वापः प्रतिष्ठिता इति । रेतसीति ।

कस्मिन्नु रेतः प्रतिष्ठितमिति ।

हृदय इति । तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति ।

हृदये ह्येव रेतः प्रतिष्ठितं भवतीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ३.९.२२ ॥

किंदेवतोऽस्यामुदीच्यां दिश्यसीति ।

सोमदेवत इति ।

स सोमः कस्मिन् प्रतिष्ठित इति । दीक्षायामिति ।

dīkṣā *f* – посвящение, вид торжественного обряда, на котором приносится в жертву сома;

कस्मिन्नु दिक्षा प्रतिष्ठितेति । सत्य इति ।

तस्मादपि दीक्षितमाहुः सत्यं वदेति ।

सत्ये ह्येव दीक्षा प्रतिष्ठितेति ।

कस्मिन्नु सत्यं प्रतिष्ठितमिति ।

हृदय इति होवाच । हृदयेन हि सत्यं जानाति ।

हृदये ह्येव सत्यं प्रतिष्ठितं भवतीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ३.९.२३ ॥

किंदेवतोऽस्यां ध्रुवायां दिश्यसीति ।

dhruvā *f* - зенит;

अग्निदेवत इति ।

सोऽग्निः कस्मिन् प्रतिष्ठित इति । वाचीति ।

कस्मिन्नु वाक्प्रतिष्ठितेति ।

हृदय इति । कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ ३.९.२४ ॥

अहल्लिकेति होवाच याज्ञवल्क्यः ।

ahallika *m* - болтун, пустослов (*значение и этимология не ясны*);

यत्रैतदन्यत्रास्मन्मन्यासै ।

यद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयांसि वैनद्विमथ्नीरन्निति ॥ ३.९.२५ ॥

vi√manth IX U. – разрывать, разрушать;

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति । प्राण इति ।

कस्मिन्नु प्राणः प्रतिष्ठित इति । अपान इति ।

apāna *m* (*от* apa√an - выдыхать) "дыхание вниз" - один из пяти жизненных «ветров» в организме, выводящее продукты жизнедеятельности;

कस्मिन्न्वपानः प्रतिष्ठित इति । व्यान इति ।

vyāna *m* (*от* vi√an - дышать, вдыхать всем телом) "пронизывающее дыхание " - один из пяти жизненных ветров в организме, связывающий органы воедино;

कस्मिन्नु व्यानः प्रतिष्ठित इति । उदान इति ।

udāna *m* (*от* ud√an – дышать вверх) "дыхание вверх" - один из пяти жизненных ветров в организме, ответственный за органы чувств и органы действия;

कस्मिन्नूदानः प्रतिष्ठित इति । समान इति ।

samāna *m* (*от* sam√an – дышать, жить) "совместное дыхание " - один из пяти жизненных ветров в организме, отвечающий за пищеварение;

स एष नेति नेत्यात्मा ।

अगृह्यो न हि गृह्यते । अशीर्यो न हि शीर्यते ।

असङ्गो न हि सज्यते । असितो न व्यथते न रिष्यति ।

sita (p.p. от √so) - связанный, скованный, соединенный;

एतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः ।

स यस्तान् पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि ।

ni√ruh I P. – переносить;
prati√vah I P. – вести навстречу;

तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति ।

तं ह न मेने शाकल्यस्तस्य ह मूर्धा विपपात ।

अपि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥ ३.९.२६ ॥

parimoṣin *m* – вор;

अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु । सर्वे वा मा पृच्छत ।

यो वः कामयते तं वः पृच्छामि सर्वान् वा वः पृच्छामीति ।

ते ह ब्राह्मणा न दधृषुः ॥ ३.९.२७ ॥

√dharṣ V P. – быть смелым, дерзать;

तान् हैतैः श्लोकैः पप्रच्छ

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ।

तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥ १ ॥

utpāṭikā *f* – кора дерева;

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः ।

तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात् ॥ २ ॥

utpaṭa *m* – сок, идущий из трещины на дереве;
ātṛṇṇa (p.p. от ā√tard) – пронзенный, раненый;

मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम् ।

अस्थीन्यन्तरतो दारुणि मज्जा मज्जोपमा कृता ॥ ३ ॥

śakara (śarala) *m, n* – щепка, кусок, фрагмент древесины;
kināṭa *n* – внутренняя часть древесного ствола;
snāvan *n* - связка, сухожилие;
dāru *n* – дерево, древесина;
majjā *f* – костный мозг, сердцевина растений;

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ।

मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ४ ॥

√vraśc (p.p. vṛkṇa) VI P. – резать, рвать, ранить;

रेतस इति मा वोचत जीवतस्तत्प्रजायते ।

धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य सम्भवः ॥ ५ ॥

añjasā *adv.* – прямо, истинно, справедливо; быстро, скоро, мгновенно;

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ।

मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ६ ॥

ā√vṛh I P. - вырывать, отрывать, искоренять;

जात एव न जायते को न्वेनं जनयेत्पुनः ।

विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम् ।

तिष्ठमानस्य तद्विद इति ॥ ७ ॥

इति तृतीयाध्याये नवमं शाकल्यब्राह्मणम् ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयोऽध्यायः ॥ ३ ॥

## अध्याय ४

जनको ह वैदेह आसां चक्रे । अथ ह याज्ञवल्क्य आवव्राज ।

तं होवाच याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानीति ।

aṇvanta *m* – тонкий вопрос;

उभयमेव संराडिति होवाच ॥ ४.१.१ ॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेति ।

अब्रवीन्मे जित्वा शैलिनिः वाग्वै ब्रह्मेति ।

jitvan śailini – *nom. pr.*;

यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेति ।

अवदतो हि किं स्यादिति । अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति । एकपाद्वा एतत्सम्राडिति ।

स वै नो ब्रूहि याज्ञवल्क्य ।

वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत ।

का प्रज्ञता याज्ञवल्क्य ।

वागेव सम्राडिति होवाच ।

वाचा वै सम्राड्बन्धुः प्रज्ञायते ।

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः

सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव संराड्ज्ञायन्ते ।

anuvyākhyāna *n* - та часть брахманов (трактатов), которая объясняет или иллюстрирует сложные сутры, неясные утверждения, встречающееся в другой части;

vyākhyāna *n* - объяснение, интерпретация, комментарии;

वाग्वै सम्राट्परमं ब्रह्म ।

नैनं वाग्जहाति । सर्वाण्येनं भूतान्यभिक्षरन्ति ।

abhi√kṣar I P. – течь рядом или вокруг, стекаться;

देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते ।

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४.१.२ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति ।

अब्रवीन्म उदङ्कः शौल्बायनः । प्राणो वै ब्रह्मेति ।

udaṅka śālbāyana – *nom.pr.;*

यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेति ।

अप्राणतो हि किं स्यादिति । अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति । एकपाद्वा एतत्सम्राडिति ।

स वै नो ब्रूहि याज्ञवल्क्य ।

प्राण एवायतनमाकाशः प्रतिष्ठा । प्रियमित्येनदुपासीत ।

का प्रियता याज्ञवल्क्य ।

प्राण एव सम्राडिति होवाच ।

प्राणस्य वै सम्राट्कामायायाज्यं याजयति ।

अप्रतिगृह्यस्य प्रतिगृह्णाति ।

अपि तत्र वधाशङ्का भवति यां दिशमेति प्राणस्यैव सम्राट्कामाय ।

प्राणो वै सम्राट्परमं ब्रह्म ।

नैनं प्राणो जहाति । सर्वाण्येनं भूतान्यभिक्षरन्ति ।

देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते ।

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४.१.३ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति ।

अब्रवीन्मे बर्कुर्वार्ष्णः । चक्षुर्वै ब्रह्मेति ।

barku vārṣṇa – *nom. pr.;*

यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेति ।

अपश्यतो हि किं स्यादिति । अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति । एकपाद्वा एतत्सम्राडिति ।

स वै नो ब्रूहि याज्ञवल्क्य ।

चक्षुरेवायतनमाकाशः प्रतिष्ठा । सत्यमित्येतदुपासीत ।

का सत्यता याज्ञवल्क्य ।

चक्षुरेव सम्राडिति होवाच ।

चक्षुषा वै सम्राट्पश्यन्तमाहुरद्राक्षीरिति ।

स आहाद्राक्षमिति तत्सत्यं भवति ।

चक्षुर्वै सम्राट्परमं ब्रह्म ।

नैनं चक्षुर्जहाति । सर्वाण्येनं भूतान्यभिक्षरन्ति ।

देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते ।

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४.१.४ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति ।

अब्रवीन्मे गर्दभीविपीतो भारद्वाजः । श्रोत्रं वै ब्रह्मेति ।

gardabhūvipīta bhāradvāja – *nom. pr.;*

यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेति ।

अशृण्वतो हि किं स्यादिति । अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति । एकपाद्वा एतत्सम्राडिति ।

स वै नो ब्रूहि याज्ञवल्क्य ।

श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्तमित्येनदुपासीत ।

कानन्तता याज्ञवल्क्य ।

दिश एव सम्राडिति होवाच ।

तस्माद्वै सम्राडपि यां काञ्च दिशं गच्छति नैवास्या अन्तं गच्छति ।

अनन्ता हि दिशः ।

दिशो वै सम्राट्छ्रोत्रम् ।

श्रोत्रं वै सम्राट्परमं ब्रह्म ।

नैनं श्रोत्रं जहाति ।सर्वाण्येनं भूतान्यभिक्षरन्ति ।

देवो भूत्वा देवानप्येति ।य एवं विद्वानेतदुपास्ते ।

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४.१.५ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति ।

अब्रवीन्मे सत्यकामो जाबालः मनो वै ब्रह्मेति ।

satyakāma jābāla – *nom. pr.;*

यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेति ।

अमनसो हि किं स्यादिति । अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति । एकपाद्वा एतत्सम्राडिति ।

स वै नो ब्रूहि याज्ञावल्क्य ।

मन एवायतनमाकाशः प्रतिष्ठानन्द इत्येनदुपासीत ।

कानन्दता याज्ञवल्क्य ।

मन एव सम्राडिति होवाच

मनसा वै सम्राट्स्त्रियमभि हार्यति तस्यां प्रतिरूपः पुत्रो जायते । स आनन्दः ।

मनो वै सम्राट्परमं ब्रह्म ।

नैनं मनो जहाति । सर्वाण्येनं भूतान्यभिक्षरन्ति ।

देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते ।

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४.१.६ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति ।

अब्रवीन्मे विदग्धः शाकल्यः । हृदयं वै ब्रह्मेति ।

vidagdha śākalya – *nom. pr.;*

यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेति ।

अहृदयस्य हि किं स्यादिति । अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति । एकपाद्वा एतत्सम्राडिति ।

स वै नो ब्रूहि याज्ञवल्क्य ।

हृदयमेवायतनमाकाशः प्रतिष्ठा । स्थितिरित्येनदुपासीत ।

का स्थितिता याज्ञवल्क्य ।

हृदयमेव सम्राडिति होवाच ।

हृदयं वै सम्राड्वर्वेषां भूतानामायतनम् ।

हृदयं वै सम्राड्वर्वेषां भूतानां प्रतिष्ठा ।

हृदये ह्येव सम्राड्वर्वाणि भूतानि प्रतिष्ठितानि भवन्ति ।

हृदयं वै सम्राट्परमं ब्रह्म ।

नैनं हृदयं जहाति । सर्वाण्येनं भूतान्यभिक्षरन्ति ।

देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते ।

हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४.१.७ ॥

इति बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्य ।अनु मा शाधीति ।

kūrca *m, n* – связка, охапка (травы); борода, усы;

स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन् रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मासि ।

एवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति ।

vṛndāraka - лучший, первый среди к.-л. (+Loc.);

नाहं तद्भगवन् वेद यत्र गमिष्यामीति ।

अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ।

ब्रवीतु भगवानिति ॥ ४.२.१ ॥

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषः ।

indha – яркий, светящийся, воспламеняющий;

तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव ।

परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ ४.२.२ ॥

अथैतद्वामेऽक्षणि पुरुषरूपमेषास्य पत्नी विराट् ।

virāj *f – nom. pr.*, женское начало вселенной;

तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशः ।

अथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डः ।

अथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिव ।

prāvaraṇa *n* – покрытие, покрывало;

अथैनयोरेषा सृतिः संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति ।

©cc-by-nc-sa 2004-2025 Н.П.Лихушина


sṛti *f* – путь; странствие; переселение душ;

यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्ति ।

एताभिर्वा एतदास्रवदास्रवति ।

तस्मादेष प्रविविक्ताहारतर इव भवत्यस्माच्छारीरादात्मनः ॥ ४.२.३ ॥

तस्य प्राची दिक्प्राञ्चः प्राणाः ।

दक्षिणा दिग्दक्षिणे प्राणाः ।

प्रतीची दिक्प्रत्यञ्चः प्राणाः ।

उदीची दिगुदञ्चः प्राणाः ।

ऊर्ध्वा दिगूर्ध्वाः प्राणाः ।

अवाची दिगवाञ्चः प्राणाः ।

सर्वा दिशः सर्वे प्राणाः ।

स एष नेति नेत्यात्मा ।

अगृह्यो न हि गृह्यते । अशीर्यो न हि शीर्यते ।

असङ्गो न हि सज्यते । असितो न व्यथते । न रिष्यति ।

अभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः ।

स होवाच जनको वैदेहोऽभयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे ।

नमस्तेऽस्तु । इमे विदेहा अयमहमस्मीति ॥ ४.२.४ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

जनकं ह वैदेहं याज्ञवल्क्यो जगाम ।

स मेने न वदिष्य इति ।

अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते ।

तस्मै ह याज्ञवल्क्यो वरं ददौ ।

स ह कामप्रश्नमेव वव्रे । तं हास्मै ददौ ।

तं ह सम्राडेव पूर्वं पप्रच्छ ॥ ४.३.१ ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति ।

आदित्यज्योतिः सम्राडिति होवाच ।

आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ।

paly√ay I Ā. (=pari√i) - двигаться, ходить вокруг;

vipaly√ay I Ā. – идти назад, возвращаться;

एवमेवैतद्याज्ञवल्क्य ॥ ४.३.२ ॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति ।

चन्द्रमा एवास्य ज्योतिर्भवतीति ।

चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ४.३.३ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इति ।

अग्निरेवास्य ज्योतिर्भवतीति ।

अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ४.३.४ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति ।

वागेवास्य ज्योतिर्भवतीति ।

वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येति ।

तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीति ।

एवमेवैतद्याज्ञवल्क्य ॥ ४.३.५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इति ।

आत्मैवास्य ज्योतिर्भवतीति ।

आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ४.३.६ ॥

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः ।

स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लोलायतीव ।

√lolāya (caus.) – приводить в движение, двигать;

स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ४.३.७ ॥

स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते ।

स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति ॥ ४.३.८ ॥

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः ।

इदं च परलोकस्थानं च । सन्ध्यं तृतीयं स्वप्नस्थानम् ।

sandhya - находящийся в соединении;

तस्मिन्सन्ध्ये स्थाने तिष्ठनुभे स्थाने पश्यतीदं च परलोकस्थानं च ।

अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति ।

स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति ।

अत्रायं पुरुषः स्वयंज्योतिर्भवति ॥ ४.३.९ ॥

न तत्र रथा न रथयोगा न पन्थानो भवन्ति ।

अथ रथान् रथयोगान् पथः सृजते ।

न तत्रानन्दा मुदः प्रमुदो भवन्ति ।

अथानन्दान्मुदः प्रमुदः सृजते ।

न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति ।

veśānta *m* – пруд, бассейн;
puṣkariṇī *f* – водоем с лотосами;

अथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते । स हि कर्ता ॥ ४.३.१० ॥

तदेते श्लोका भवन्ति

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति ।

abhipra√han II P. – одолевать, побеждать;

शुक्रमादाय पुनरैति स्थानं हिरण्मयःपुरुष एकहंसः ॥ ४.३.११ ॥

प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा ।

avara – нижний, маленький, поздний, западный;
kulāya *m, n* – гнездо;

स ईयतेऽमृतो यत्रकामं हिरण्मयः पुरुष एकहंसः ॥ ४.३.१२ ॥

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ।

svapnānta *m* – состояние сна;

उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ ४.३.१३ ॥

आराममस्य पश्यन्ति न तं पश्यति कश्चनेति ।

ārāma *m* -  радость; сад для увеселений;

तं नायतं बोधयेदित्याहुः ।

āyatam *adv.* – быстро, без промедления;

दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते ।

अथो खल्वाहुर्जागरितदेश एवास्यैष इति ।

यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति ।

अत्रायं पुरुषः स्वयंज्योतिर्भवति ।

सोऽहं भगवते सहस्रं ददामि ।

अत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ ४.३.१४ ॥

स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव ।

saṃprasāda *m* – благополучие, покой, веселье; глубокий сон
pratinyāyam *adv.* – в обратном порядке;
pratiyoni *adv.* – соответственно источнику или происхождению;

स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवति ।

असङ्गो ह्ययं पुरुष इति ।

एवमेवैतत्याज्ञवल्क्य ।

सोऽहं भगवते सहस्रं ददामि ।

अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ ४.३.१५ ॥

स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ।

स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवति ।

असङ्गो ह्ययं पुरुष इति ।

एवमेवैतत्याज्ञवल्क्य ।

सोऽहं भगवते सहस्रं ददामि ।

अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ ४.३.१६ ॥

स वा एष एतस्मिन् बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ ४.३.१७ ॥

तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं च ।

एवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥ ४.३.१८ ॥

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियते ।

saṃlaya *m* – садясь, устраиваясь (поудобнее);

एवमेवायं पुरुष एतस्मा अन्ताय धवति ।

यत्र सुप्तो न कं चन कामं कामयते न कं चन स्वप्नं पश्यति ॥ ४.३.१९ ॥

ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति ।

शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णाः ।

अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति ।

√jyā (pr. jināti) IX P. – побеждать, одолевать;
√vicchāyaya (*caus*. от vi√ccho) P. – ранить, резать;
garta *m* – дыра, отверстие, яма;

यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते ।

अथ यत्र देव इव राजेवाहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ ४.३.२० ॥

तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माभयं रूपम् ।

तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किं चन वेद नान्तरम् ।

एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किं चन वेद नान्तरम् ।

तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ॥ ४.३.२१ ॥

अत्र पितापिता भवति मातामाता लोका अलोका देवा अदेवा वेदा अवेदाः ।

अत्र स्तेनोऽस्तेनो भवति भ्रूणहाभ्रूणहा चाण्ड्यालोऽचण्ड्यालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसः ।

bhrūṇa *n* - эмбрион, зародыш; *m* ученый брахман;
paulkasa *m* - сын шудры или нишады и кшатрийки;

अनन्वागतं पुण्येनानन्वागतं पापेन ।

तीर्णो हि तदा सर्वाञ्शोकान् हृदयस्य भवति ॥ ४.३.२२ ॥

यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति ।

न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।

viparilopa *m* – разрушение, утрата, разорение;

न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥ ४.३.२३ ॥

यद्वै तन्न जिघ्रति जिघ्रन् वै तन्न जिघ्रति ।

न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।

न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ ४.३.२४ ॥

यद्वै तन्न रसयति रसयन् वै तन्न रसयति ।

√rasaya *den.* – пробовать на вкус, смаковать;

न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।

न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ ४.३.२५ ॥

यद्वै तन्न वदति वदन् वै तन्न वदति ।
न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।
न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ ४.३.२६ ॥

यद्वै तन्न शृणोति शृण्वन् वै तन्न शृणोति ।
न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।
न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ ४.३.२७ ॥

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते ।
न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।
न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ ४.३.२८ ॥

यद्वै तन्न स्पृशति स्पृशन् वै तन्न स्पृशति ।
न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।
न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ ४.३.२९ ॥

यद्वै तन्न विजानाति विजानन् वै तन्न विजानाति ।
न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात् ।
न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ४.३.३० ॥

यत्र वा अन्यदिव स्यात्
तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्यो
ऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ४.३.३१ ॥

सलिल एको द्रष्टाद्वैतो भवति । एष ब्रह्मलोकः सम्राट् ।
इति हैनमनुशशास याज्ञवल्क्यः ।
एषास्य परमा गतिः । एषास्य परमा संपत् ।
एषोऽस्य परमो लोकः । एषोऽस्य परम आनन्दः ।
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ४.३.३२ ॥

स यो मनूष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः स मनुष्याणां परम आनन्दः ।

अथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दः ।

jitaloka – завоевавший небо;

अथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दः ।

अथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते ।

अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दः । यश्च श्रोत्रियोऽवृजिनोऽकामहतः ।

अथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दः । यश्च श्रोत्रियोऽवृजिनोऽकामहतः ।

अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दः । यश्च श्रोत्रियोऽवृजिनोऽकामहतः ।

अथैष एव परम आनन्दः । एष ब्रह्मलोकः सम्राट् । इति होवाच याज्ञवल्क्यः ।

सोऽहं भगवते सहस्रं ददामि । अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

अत्र ह याज्ञवल्क्यो बिभयां चकार मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति ॥ ४.३.३३ ॥

ud√rudh VII U. - отталкивать, отгонять;

स वा एष एतस्मिन् स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ४.३.३४ ॥

तद्यथानः सुसमाहितमुत्सर्जं यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जं याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ४.३.३५ ॥

anas *n* – повозка, телега;
utsarjam *adv.* – отпуская, освобождая, прекращая;

स यत्रायमणिमानं न्येति जरया वोपतपता वाणिमानं निगच्छति ।

तद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यते ।

एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥ ४.३.३६ ॥

तद्यथा राजानमायन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरवसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीति ।

ugra *m* – согласно одним источникам это могут быть надзиратели и змееловы, по другим источникам – барды и сочинители хвалебных песен;
pratyenas *m* – судья;
prati√kalp I Ā. – быть на службе, принимать гостеприимно, устраивать;

एवं हैवंविदं सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्मायातीदमागच्छतीति ॥ ४.३.३७ ॥

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्ति ।

एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति । यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ४.३.३८ ॥

इति बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य तृतीयं ब्राह्मणम् ॥

स यत्रायमात्माबल्यं न्येत्य संमोहमिव न्येति । अथैनमेते प्राणा अभिसमायन्ति ।

स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ।

स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्तते । अथारूपज्ञो भवति ॥ ४.४.१ ॥

एकीभवति न पश्यतीत्याहुः । एकीभवति न जिघ्रतीत्याहुः ।

एकीभवति न रसयतीत्याहुः । एकीभवति न वदतीत्याहुः ।

एकीभवति न शृणोतीत्याहुः । एकीभवति न मनुत इत्याहुः ।

एकीभवति न स्पृशतीत्याहुः । एकीभवति न विजानातीत्याहुः ।

तस्य हैतस्य हृदयस्याग्रं प्रद्योतते । तेन प्रद्योतेनैष आत्मा निष्क्रामति ।

चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः ।

तमुत्क्रामन्तं प्राणोऽनूत्क्रामति ।

प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति ।

सविज्ञानो भवति । संजानमेवान्ववक्रामति ।

तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ ४.४.२ ॥

samanvā√rabh I Ā. – держаться вместе, держаться друг за друга;

तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति ।

tṛṇajalāyukā *f* – гусеница;
upasaṃ√har I P. – сближать, сжимать, собирать;

एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति ॥ ४.४.३ ॥

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरं रूपं तनुते ।

peśas *n* – образ, форма, цвет; украшение, орнамент;
peśaskārin *m* – оса;

एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं कुरुते ।

पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानाम् ॥ ४.४.४ ॥

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय

आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयः ।

तद्यदेतदिदंमयोऽदोमय इति ।

यथाकारी यथाचारी तथा भवति ।

साधुकारी साधुर्भवति । पापकारी पापो भवति ।

पुण्यः पुण्येन कर्मणा पापः पापेन ।

अथो खल्वाहुः । काममय एवायं पुरुष इति ।

स यथाकामो भवति तत्क्रतुर्भवति ।

यत्क्रतुर्भवति तत्कर्म कुरुते ।

यत्कर्म कुरुते तदभिसंपद्यते ॥ ४.४.५ ॥

abhisaṃ√pad I Ā. – становиться, меняться; придти, получить;

तदेष श्लोको भवति

तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य ।

प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् ।

तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे ।

इति नु कामयमानः ।

अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ।

ब्रह्मैव सन् ब्रह्माप्येति ॥ ४.४.६ ॥

तदेष श्लोको भवति

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।

अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ।

तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत । एवमेवेदं शरीरं शेते ।

nirlvayanī (nirvlayanī) *f* – сброшенная змеиная кожа;

अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव ।

सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ४.४.७ ॥

तदेते श्लोका भवन्ति

अणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव ।

तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ४.४.८ ॥

तस्मिञ्शुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितं च ।

एष पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ४.४.९ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्यायां रताः ॥ ४.४.१० ॥

अनन्दा नाम ते लोका अन्धेन तमसावृताः ।

तांस्ते प्रेत्याभिगच्छत्यविद्वांसोऽबुधा जनाः ॥ ४.४.११ ॥

आत्मानं चेद्विजानीयादयमस्मीति पुरुषः ।

किमिच्छन् कस्य कामाय शरीरमनु संज्वरेत् ॥ ४.४.१२ ॥

anusaṃ√jvar I P. - чувствовать себя расстроенным, беспокоиться;

यस्यानुवित्तः प्रतिबुद्ध आत्मास्मिन् संदेह्ये गहने प्रविष्टः ।

स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥ ४.४.१३ ॥

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः ।

avedi *f* - невежество;

ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥ ४.४.१४ ॥

यदैतमनुपश्यत्यत्मानं देवमञ्जसा ।

añjasā *adv.* – прямо, правильно; справедливо, истинно; быстро, скоро;

ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ ४.४.१५ ॥

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ।

तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ ४.४.१६ ॥

यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।

तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम् ॥ ४.४.१७ ॥

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः ।

ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ ४.४.१८ ॥

ni√ci III P. - воспринимать, замечать, наблюдать, распознавать;

मनसैवानुद्रष्टव्यं नेह नानास्ति किं चन ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। ४.४.१९ ॥

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ।

apramaya - неувядаемый, нетленный, вечный;

विरजः पर आकाशादज आत्मा महान् ध्रुवः ॥ ४.४.२० ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।

नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं हि तदिति ॥ ४.४.२१ ॥

viglāpana *n* - усталость, утомление;

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु ।

य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते ।

सर्वस्य वशी । सर्वस्येशानः । सर्वस्याधिपतिः ।

स न साधुना कर्मणा भूयान् । नो एवासाधुना कनीयान् ।

एष सर्वेश्वरः । एष भूताधिपतिः । एष भूतपालः ।

एष सेतुर्विधरण एषां लोकानामसंभेदाय ।

vidharaṇa *n* – сдерживание;

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ।

anāśaka *n* – пост, воздержание от пищи;

एतमेव विदित्वा मुनिर्भवति ।

एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ।

एतद्ध स्म वैतत्पूर्वे विद्वांसः प्रजां न कामयन्ते ।

किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ।

ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ।

या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः ।

स एष नेति नेत्यात्मा ।

अगृह्यो न हि गृह्यते । अशीर्यो न हि शीर्यते ।

असङ्गो न हि सज्यते । असितो न व्यथते न रिष्यति ।

एतमु हैवेते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमिति ।

उभे उ हैवैष एते तरति नैनं कृताकृते तपतः॥ ४.४.२२ ॥

तदेतदृचाभ्युक्तम्

एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् ।

तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति ।

padavid - сведущий;

तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति । सर्वमात्मानं पश्यति ।

uparata - успокоившийся, прекративший, умерший;
titikṣṇu – терпеливый;

नैनं पाप्मा तरति । सर्वं पाप्मानं तरति । नैनं पाप्मा तपति । सर्वं पाप्मानं तपति ।

विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति ।

vicikitsā *f* – сомнение, неуверенность;

एष ब्रह्मलोकः सम्राट् । एनं प्रापितोऽसीति होवाच याज्ञवल्क्यः ।

सोऽहं भगवते विदेहान् ददामि मां चापि सह दास्यायेति ॥ ४.४.२३ ॥

स वा एष महानज आत्मान्नादो वसुदानः ।

विन्दते वसु य एवं वेद ॥ ४.४.२४ ॥

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म ।

अभयं वै ब्रह्म । अभयं हि वै ब्रह्म भवति य एवं वेद ॥ ४.४.२५ ॥

इति चतुर्थं ब्राह्मणम् ॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च ।

maitreyī, kātyāyanī – *nom.pr.*;

तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव । स्त्रीप्रज्ञैव तर्हि कात्यायनी ।

अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ ४.५.१ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः । प्रव्रजिष्यन् वा अरेऽहमस्मात्स्थानादस्मि ।
हन्त तेऽनया कत्यायन्यान्तं करवाणीति ॥ ४.५.२ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताहो३ नेति ।

नेति होवाच याज्ञवल्क्यः ।

©cc-by-nc-sa 2004-2025 Н.П.Лихушина


यथैवोपकरणवतां जीवितम् । तथैव ते जीवितं स्यात् ।

अमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ४.५.३ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्याम् ।

यदेव भगवान् वेद तदेव मे ब्रूहीति ॥ ४.५.४ ॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधत् ।

हन्त तर्हि । भवत्येतद्व्याख्यास्यामि ते । व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४.५.५ ॥

स होवाच । न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति ।

न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति ।

न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति ।

न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति ।

न वा अरे पशूनां कामाय पशवः प्रियं भवत्यात्मनस्तु कामाय पशवः प्रियं भवति ।

न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति ।

न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति ।

न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति ।

न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति ।

न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति ।

न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति ।

न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति ।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि ।

आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ॥ ४.५.६ ॥

ब्रह्म तं परादाद्योऽन्यत्रात्मनो वेदान् वेद ।

क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद ।

लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद ।

देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद ।

वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान् वेद ।

भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद ।

सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ।

इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा ॥ ४.५.७ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय ।

दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ४.५.८ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय ।

शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ४.५.९ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय ।

वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ४.५.१० ॥

स यथा सर्वासामपां समुद्र एकायनम् ।

एवं सर्वेषां स्पर्शानां त्वगेकायनम् ।

एवं सर्वेषां गन्धानां नासिके एकायनम् ।

एवं सर्वेषां रसानां जिह्वैकायनम् ।

एवं सर्वेषां रूपाणां चक्षुरेकायनम् ।

एवं सर्वेषं शब्दानां श्रोत्रमेकायनम् ।

एवं सर्वेषां संकल्पानां मन एकायनम् ।

एवं सर्वासां विद्यानां हृदयमेकायनम् ।

एवं सर्वेषां कर्मणां हस्तावेकायनम् ।

एवं सर्वेषामानन्दानामुपस्थ एकायनम् ।

एवं सर्वेषां विसर्गाणां पायुरेकायनम् ।

एवं सर्वेषामध्वनां पादावेकायनम् ।

एवं सर्वेषां वेदानां वागेकायनम् ॥ ४.५.१२ ॥

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव ।

एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव ।

एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनयति ।

न प्रेत्य संज्ञास्तीत्यरे ब्रवीमि । इति होवाच याज्ञवल्क्यः ॥ ४.५.१३ ॥

सा होवाच मैत्रेयी अत्रैव मा भगवान्मोहान्तमापीपदत् ।

न वा अहमिमं विजानामीति ।

स होवाच न वा अरेऽहं मोहं ब्रवीमि ।

अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा ॥ ४.५.१४ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति ।

यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत्तत्केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयात् ।

येनेदं सर्वं विजानाति तं केन विजानीयात् ।

स एष नेति नेत्यात्मा ।

अगृह्यो न हि गृह्यते । अशीर्यो न हि शीर्यते ।

असङ्गो न हि सज्यते । असितो न व्यथते न रिष्यति ।

विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेयि ।

एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥ ४.५.१५ ॥

इति पञ्चमं ब्राह्मणम् ॥

अथ वंशः । पौतिमाष्यो गौपवनात् । गौपवनः पौतिमाष्यात् । पौतिमाष्यो गौपवनात् । गौपवनः कौशिकात् ।

कौशिकः कौण्डिन्यात् । कौण्डिन्यः शाण्डिल्यात् । शाण्डिल्यः कौशिकाच्च गौतमाच्च ।गौतमः ॥ ४.६.१ ॥

अग्निवेश्यात् । अग्निवेश्यो गार्ग्यात् । गार्ग्यो गार्ग्यात् । गार्ग्यो गौतमात् । गौतमः सैतवात् । सैतवः पाराशर्यायणात् ।

पाराशर्यायणो गार्ग्यायणात् । गार्ग्यायण उद्दालकायनात् । उद्दालकायनो जाबालायनात् । जाबालायनो माध्यन्दिनायनात् ।

माध्यन्दिनायनः सौकरायणात् । सौकरायणः काषायणात् । काषायणः सायकायनात् । साकायनः कौशिकायनेः

कौशिकायनिः ॥ ४.६.२ ॥

घृतकौशिकात् । घृतकौशिकः पाराशर्यात् । पाराशर्यः पाराशर्यात् । पाराशर्यो जातुकर्ण्यात् ।

जातुकर्ण्य आसुरायणाच्च यस्काच्च । आसुरायणस्त्रैवणेः । त्रैवणिरौपजन्धनेः । औपजन्धनिरासुरेः ।

आसुरिर्भारद्वाजात् । भारद्वाज आत्रेयात् । आत्रेयो माण्टेः । माण्टिर्गौतमात् । गौतमो गौतमात् ।

गौतमो वात्स्यात् । वात्स्यः शाण्डिल्यात् । शाण्डिल्यः कैशोर्यात्काप्यात् । कैशोर्यः काप्यः कुमारहरितात् ।

कुमारहरितो गालवात् । गालवो विदर्भीकौण्डिन्यात् । विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात् ।

वत्सनपाद्बाभ्रवः पथः सौभरात् । पन्थाः सौभरोऽयास्यादङ्गिरसात् । अयास्य आङ्गिरस आभुतेस्त्वाष्ट्रात् ।

आभुतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रात् । विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम् । अश्विनौ दधिच आथर्वणात् ।

दध्यङ्ङाथर्वणोऽथर्वणो दैवात् । अथर्वा दैवो मृत्योः प्राध्वंसनात् । मृत्युः प्राध्वंसनः प्राध्वंसनात् ।

प्राध्वंसनः एकर्षेः । एकर्षिर्विप्रजित्तेः । विप्रजित्तिर्व्यष्टेर् । व्यष्टिः सनारोः । सनारुः सनातनात् ।

सनातनः सनगात् । सनगः परमेष्ठिणः । परमेष्ठी ब्रह्मणः । ब्रह्म स्वयम्भु । ब्रह्मणे नमः ॥ ४.६.३ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य षष्ठं ब्राह्मणम् ॥६ ॥

इति बृहदारण्यकोपनिषदि चतुर्थोऽध्यायः ॥४ ॥